पारदर्शी च। जगन्नाथोऽयमन्तिमावस्थायां वृद्ध-प्रपौत्रादिसुखमवलोक्य अतिदुर्लभमेतादृशं संसारसुखमनुभूय शकनरपतेः १७२६ वत्सरे (१२१४वङ्गाब्दे) आश्विनकृष्णपञ्चमीयुततृतीयायां गङ्गातीरे प्राणान् तत्याज। मृत्योः प्राक्काल-पर्य्यन्तमेवास्येन्द्रियशैथिल्यं न जातम्। गङ्गा-तीरं गतेन सुमुमूर्षुणामुना मृत्युप्राक्काले कृतः श्लोको यथा,—

"केचिद्वदन्ति निराकारं नराकारञ्च केचन।
वयन्तु दीर्घयोगेन नीराकारमुपास्महे॥" इति॥)

जगन्नुः, पुं, (जगता विश्वस्थजीवजातेन नम्यते इति। जगत्+नम्+वाहुलकात् डुः। यद्वा, नु+क्विप् पृषो। नु नवनं स्तुतिरित्यर्थः जगति विश्वसंसारे नुः स्तुतिर्यस्य। सर्व्वजीवस्तुतत्वा-देवास्य तथात्वम्।) अग्निः। जन्तुः। इति विश्वः शब्दरत्नावली च॥ जगनुरपि पाठः॥

जगरः, पुं, (जागर्त्ति संग्रामेऽनेनेति। जागृ+अप्। पृषोदरादित्वात् साधुः।) कवचः। इति हेमचन्द्रः। ३। ४३०॥

जगलः, पुं, (पुनःपुनरतिशयेन वा गलतीति। गल चरणे+यङ्लुगन्तात् अच्। संज्ञापूर्ब्बक-त्वात् "दीर्घोऽकितः।" ७।४।८३। इति न दीर्घः। यद्वा, जन्+डः। जः जातः सन् गलति निर्गच्छ-तीति। गल+अच्।) सुराकल्कम्। मेया इति भाषा॥ तत्पर्य्यायः। मेदकः २। इत्य-मरः। २।१०।४२॥ (यथा, शार्ङ्गधरे मध्य-खण्डे दशमेऽध्याये।

"तदधो जगलो ज्ञेयो मेदको जगलाह्वनः॥")

मदनद्रुमः पिष्टमद्यम्। (तद्गुणा यथा,—

"शूलप्रवाहिकाटोपकफवातार्शसां हितः।
जगलो ग्राहिरूक्षोष्णः शोफघ्नो भक्तपाचनः॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥

"ग्राह्युष्णो जगलः पक्ता रूक्षस्तृट्कफशोफहृत्।
हृद्यः प्रवाहिकाटोपदुर्नामानिलशोषहृत्॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये॥)

धूर्त्ते त्रि। इति मेदिनी। ले, ६१॥ कवचः। रलयोरैक्यात्॥ गोमये, क्ली। इति रत्नमाला॥ (यथा, वैद्यकरत्नमालायाम्।

"गोमयं जगलं गोविट् गोहन्नं तच्च गोशकृत्॥")

जग्धं, त्रि, (अद्यते स्म इति। अद् भक्षणे+क्तः। "अदो जग्धिर्ल्यप्ति किति।" २।४।३६। इति जग्ध्यादेशः। इकार उच्चारणार्थः।) भक्तम्। इत्यमरः। ३। २। १११॥ ("स्निग्धं घनं कुटजवल्कमजन्तु जग्धम्॥"
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे॥)

जग्धिः, स्त्री, (अद भक्षणे+क्तिन्। "अदो जग्धि-र्ल्यप्ति किति।" २। ४। ३६। इति जग्ध्या-देशः।) सहभोजनम्। इत्यमरः। २।९।५५॥ भक्षणम्। इति हेमचन्द्रः॥ (यथा, मनौ। ३। ११५।

"अदत्त्वा तु य एतेभ्यः पूर्ब्बं भुङ्क्तेऽविचक्षणः।
स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः॥")

जग्मिः, पुं, (गच्छति इतस्ततो वातीति। गम+"आदृगमहनजनः किकिनौ लिट् च।" ३।२।१७१। इत्यस्य "भाषायां धाञ्कृसृगमिजनि-नमिभ्यः।" इति वार्त्तिकोक्त्या किन्त्वञ्च।) वायुः। इति केचित्॥

जघनं, क्ली, (हन्यते इति। हन्+"हन्तेः शरीरा-वयवे द्वे च।" उणां। ५। ३२। इति अच् द्वित्वञ्च। "अभ्यासाच्च।" ७। ३। ५५। इति कुत्वम्।) स्त्रीकट्याः पुरोभागः। (यथा, माघे। ५। २९।

"नाभिह्रदैः परिगृहीतरयाणि यत्र
स्त्रीणां बृहज्जघनसेतुनिवारितानि॥")

कटिः। इति मेदिनी। ने, ६७॥ (यथा, देवी-भागवते। १। ९। ८१।

"भगवान् द्विगुणं चक्रे जघनं विस्मितौ तदा।
शीर्षे सन्दधतां तत्र जघने परमाद्भुते॥")

जघनकूपकौ, पुं, (जघनकूपे इव कायतः इति। कै+कः।) कुकुन्दरौ। इति हलायुधः॥ द्विवचनान्तोऽयं शब्दः॥

जघनेफला, स्त्री, (जघने इव मध्यभागे फलमस्याः।) काकोडुम्बरिका। इत्यमरः। २। ४। ६१॥

जघन्यः, त्रि, (कुटिलं हन्यते निन्द्यते इति। हन+यङन्तात् अचो यत्। अनित्यमागमशासन-मिति नुगतोऽनुनासिकान्तस्येति न नुक्। यद्वा, जघनमिव। "शाखादिभ्यो यत्।" ५। ३। १०३। इति यत्।) चरमः। (यथा, वैद्यकचक्र-पाणिसंग्रहे स्नेहाधिकारे।

"उत्तमस्य पलं मात्रा त्रिभिरक्षैश्च मध्यमे।
जघन्यस्य पलार्द्धेन स्नेहकाथ्यौषधेषु च॥")

गर्हितः। (यथा, महाभारते। ३। ३५। १३।

"तत्र द्यूतमभवन्नो जघन्यं
तस्मिन् जिताः प्रव्रजिताश्च सर्व्वे॥"*॥

जघने कटिदेशे भवम्। दिगादित्वात् यत्।) मेहने, क्ली। इति मेदिनी। ये, ८३॥ पुं, शूद्रः। इति शब्दरत्नावली॥ (हीनजातिमात्रम्। यथा, मनौ। ८। ३६६।

"उत्तमां सेवमानस्तु जघन्यो वधमर्हति॥"

"हीनजातिरुत्कृष्टजातीयां कन्यामिच्छन्ती-मनिच्छन्तीं वा गच्छन् जात्यपेक्षयाऽङ्गच्छेदन-मारणात्मकं वधमर्हति॥" इति तट्टीकायां कुल्लूकभट्टः॥*॥ पृष्ठभागः। यथा, रामा-यणे। २। १०४। २९।

"ततो जघन्यं सहितैः स्वमन्त्रिभिः
पुरप्रधानैश्च तथैव सैनिकैः।
जनेन धर्म्मज्ञतमेन धर्म्मवा-
नुपोपविष्टो भरतस्तदाग्रजम्॥"

"जघन्यं जघनभागं पृष्ठभागमाश्रितः सन्।" इति तट्टीकायां रामानुजः॥*॥ राजानुचर-विशेषः। यथा, बृहत्संहितायाम्। ६९। ३१, ३३—३४।

"पश्चापरे वामनको जघन्यः
कुब्जोऽपरो मण्डलकोऽथ सामी।
पूर्ब्बोक्तभूपानुचरा भवन्ति
सङ्कीर्णसंज्ञाः शृणु लक्षणैस्तान्॥"

"मालव्यसेवी तु जघन्यनामा
खण्डेन्दुतुल्यश्रवणः सुगन्धिः।
शुक्रेण सारः पिशुनः कविश्च
रूक्षच्छविः स्थूलकराङ्गुलीकः॥
क्रूरो धनी स्थूलमतिः प्रतीत-
स्ताम्रच्छविः स्यात् परिहासशीलः।
उरोऽङ्घ्रिहस्तेष्वसिशक्तिपाश-
परश्वधाङ्कश्च जघन्यनामा॥")

जघन्यजः, पुं स्त्री, (जघन्ये चरमे जायते इति। जन्+"सप्तम्यां जनेर्डः।" ३। २। ९७। इति डः।) शूद्रः। कनिष्ठे, त्रि॥ इति मेदिनी॥ जे, ३२॥ (यथा, महाभारते। १। ६५। १६।

"एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिकः॥")

जघ्निः, पुं, (हन्यते इति। हन+"आदृगम-हनेति।" ३। २। १७१। इति किन् द्वित्वञ्च।) हननयोग्यास्त्रम्। इति संक्षिप्तसारः॥ (यथा, ऋग्वेदे। ९। ६१। २०।

"जघ्निर्वृत्रममित्रियं सस्निर्व्वाजं दिवे दिवे॥")

जघ्नुः, त्रि, (हन्तीति। हन वधे+"कुर्भ्रश्च।" उणां।१।२३। चकारात् हन्तेरपि कुर्द्वित्वञ्च।) हन्ता। हननकर्त्ता। इत्युणादिकोषः॥

जङ्गमः, त्रि, (पुनः पुनर्गच्छतीति। गम्+यङ्+अच्।) अस्थावरः। गतिशक्तिविशिष्टः। तत्-पर्य्यायः। चरिष्णुः २ चरः ३ त्रसः ४ इङ्गः ५ चराचरः ६। इत्यमरः। ३। १। ७४॥ (यथा, रघौ। २। ४४।

"मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः॥"

"ओषधयस्तावद्द्विविधाः स्थावरा जङ्गमाश्च।"

"जङ्गमास्वपि चतुर्व्विधा जरायुजाण्डजस्वेद-जोद्भिज्जाः। तत्र पशु-मनुष्य-व्यालादयो जरा-युजाः। खग-सर्प-सरीसृप-प्रभृतयोऽण्डजाः। कृमिकीटपिपीलिकाप्रभृतयः स्वेदजाः। इन्द्र-गोपमण्डूकप्रभृतय उद्भिज्जाः॥" इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये॥)

जङ्गमकुटी, स्त्री, (जङ्गमा गतिशक्तिविशिष्टा कुटी गृहमिव।) छत्रम्। इति त्रिकाण्डशेषः॥

जङ्गलं, त्रि, (पुनः पुनरतिशयेन वा गलतीति। गल+यङ्+अच्। पृषोदरादित्वात् साधुः।) निर्ज्जलदेशः। इति शब्दरत्नावली॥ निर्ज्जन-स्थानम्। पिशिते, क्ली। इति मेदिनी। ले, ६३॥

जङ्गालः, पुं, (जङ्गं कुटिलगतिं अलति प्राप्नो-तीति। अल+"कर्म्मण्यण्।" ३।२।१ इत्यण्।) रोधविशेषः। जाङ्गाल इति भाषा॥ तत्-पर्य्यायः। आलिः २ पङ्क्तारः ३ सेतुः ४ सम्वरः ५। इति जटाधरः॥

जङ्गुलं, क्ली, विषम्। इति त्रिकाण्डशेषः॥

जङ्घा, स्त्री, (जङ्घन्यते कुटिलं गच्छतीति। हन वधे गतौ च यङ्लुगन्तात्+"अन्येभ्योऽपीति।"